## मनसः सञ्ज्ञायाम् । (४/०६१)

मनसः उत्तरस्याः तृतीयायाः [1]सञ्ज्ञायामलुग् भवति । मनसादत्ता । [2]मनसागुप्ता । मनसासङ्गता । सञ्ज्ञायाम् इति किम् ? मनोदत्ता[3] । [4]मनोगुप्ता ॥

## आज्ञायिनि च । (५/०६२)

[5]आज्ञायिन्युत्तरपदे मनसः उत्तरस्य तृतीयायाः अलुग् भवति । मनसा आज्ञातुं शीलमस्य मनसाज्ञायी ॥

## आत्मनश्च पूरणे । (६/०६३)

आत्मनः [6]उत्तरस्याः तृतीयायाः पूरणप्रत्ययान्ते उत्तरपदेऽलुग् भवति । आत्मनापञ्चमः । आत्मनाषष्ठः । 'तृतीयाविधाने प्रकृत्यादिभ्य उपसङ्ख्यानम्' (वा. २५) इति तृतीया । तृतीया इति योगविभागात् समासः । आत्मना वा कृतः पञ्चमः आत्मनापञ्चमः । कथं जनार्दनस्त्वात्मचतुर्थ एव इति ? बहुव्रीहिरयम् आत्मा चतुर्थोऽस्यासौ[7] आत्मचतुर्थः (म. भा. ३. १४३) ॥

## वैयाकरणाख्यायां चतुर्थ्याः । (७/०६४)

वैयाकरणानामाख्या वैयाकरणाख्या । आख्या सञ्ज्ञा । यया सञ्ज्ञया वैयाकरणा एव व्यवहरन्ति तस्यामा[8]त्मनः उत्तरस्या[9]श्चतुर्थ्या अलुग्भवति[10] । आत्मनेपदम् । आत्मनेभाषा । [11]तादर्थ्ये चतुर्थी (वा. १२०)। चतुर्थी इति योगविभागात् समासः ॥

## परस्य च । (८/०६५)

परस्य च[12] या चतुर्थी [13]तस्या वैयाकरणाख्यायाम् अलुग् भवति । परस्मैपदम् । परस्मैभाषा ॥

## हलदन्तात् सप्तम्याः सञ्ज्ञायाम् । (९/०६६)

हलन्तादकदन्ताच्चोत्तरस्याः सप्तम्याः सञ्ज्ञायाम् [14]अलुग् भवति । युधिष्ठिरः । त्वचिसारः । गविष्ठिरः इत्यत्र तु 'गवियुधिभ्यां [15]स्थिरः' (८. ३. ९५/९६७) [16]इत्यत एव [17]वचनादलुक् । अदन्तात् – अरण्येतिलकाः । अरण्येमाषकाः । वनेकिंशुकाः । वनेहरिद्रकाः । [18]वनेबल्वजकाः । [19]पूर्वाह्णेस्फोटकाः । कूपे[20]पिशाचकाः । हलदन्ताद् इति किम् ? नद्यां कुक्कुटिका नदीकुक्कुटिका । भूम्यां पाशाः भूमिपाशाः । सञ्ज्ञायाम् इति किम् ? अक्षशौण्डः ।

[७१९] हृद्द्युभ्यां ङेः[21] । (म. भा. ३. १४३)

हृद् दिव् इत्येतेभ्यामुत्तरस्य ङेरलुग् भवति । हृदिस्पृक् । दिविस्पृक् (म. भा. ३. १४३) ॥

---

1. उत्तरपदे इत्यधिकम् फ. 2. उदाहरणमिदं नास्ति फ. 3. कन्या इत्यधिकम् ब. क. ड. फ. 4. उदाहरणमिदं नास्ति फ. 5. आज्ञायिनि चोत्तरपदे क. फ. ह 6. उत्तरस्याः नास्ति फ. 7. असौ नास्ति फ. 8. गम्यमानायाम् इत्यधिकम् ह. 9. च इत्यधिकम् फ. 10. उत्तरपदे परतः इत्यधिकम् ह. 11. वाक्यमिदं नास्ति फ. 12. उत्तरस्य इत्यधिकम् ब. 13. तस्यां क. 14. विषये इत्यधिकम् फ. 15. स्थिरः नास्ति फ. 16. इत्यस्य फ. 17. वचनात् नास्ति फ. 18. वनेबिल्वजाः फ, वनेबिल्वकाः ह. 19. उदाहरणमिदं नास्ति फ. 20. पिशाचिका क. 21. अलुग्वक्तव्यः इत्यधिकम् फ. क, उपसङ्ख्यानम् इत्यधिकम् ब.